पशुः। मधुरो गुडः। इतिकरणो विवक्षार्थः सर्वत्राभिधेयनियमं करोति। इह न भवति, ऊषोऽस्मिन् घटे विद्यते, मधु अस्मिन् घटे विद्यते (म.भा. २.३९७) इति।

[५७७] रप्रकरणे खमुखकुञ्जेभ्य उपसङ्ख्यानम्। (म.भा. २.३९७)

खमस्यास्ति कण्ठविवरं महत् खरः। मुखमस्यास्तीति सर्वस्मिन् वक्तव्ये मुखरः। कुञ्जावस्य स्तः कुञ्जरः। हस्तिहनू कुञ्जशब्देनोच्येते।

[५७८] नगपांसुपाण्डुभ्यश्चेति वक्तव्यम्। (म.भा. २.३९७)

नगरम्। पांसुरम्। पाण्डुरम्।

[५७९] कच्छ्वा ह्रस्वत्वं च।

[1]कच्छुरम्॥

## द्युद्रुभ्यां मः। (१०८/१९१७)

द्युद्रुशब्दाभ्यां मः प्रत्ययो भवति मत्वर्थे। द्युमः। द्रुमः। रूढिशब्दौ एतौ। रूढिषु मतुप् पुनर्न [2]विकल्प्यते॥

## केशाद्वोऽन्यतरस्याम्। (१०९/१९१८)

केशशब्दाद् वः प्रत्ययो भवति मत्वर्थे अन्यतरस्याम्। ननु च प्रकृतमन्यतरस्यांग्रहणमनुवर्तत एव? मतुप्समुच्चायार्थं तदित्युक्तम्। अनेन तु इनिठनौ प्राप्येते। ततश्चातूरूप्यं [3]भवति, केशवः, केशी, केशिकः, केशवान् इति।

[५८०] वप्रकरणेऽन्येभ्योऽपि दृश्यते इति वक्तव्यम्। (म.भा. २.३९७)

मणिवः। हिरण्यवः। [4]कुररावः। [5]कुमारावः। [6]कुञ्जावः। [7]राजीवम्। इष्टकावः। विम्बावः।

[५८१] अर्णसो [8]लोपश्च।

अर्णवः।

[५८२] छन्दसीवनिपौ च वक्तव्यौ। (म.भा. २.३९७)

'रथीरभून् मुद्गलानी गविष्ठौ' (ऋ. १०.१०२.२)। '[9]सुमङ्गलीरियं वधूः' (ऋ. १०.८५.३३)। वनिप्–'मघवानमीमहे' (ऋ. १०.१६७.२)। वकारमतुपौ च। उद्वा च उद्वती च।

[५८३] मेधारथाभ्यामिरन्निरचौ वक्तव्यौ। (म.भा. २.३९७)

'मेधिरः' (ऋ. १.३१.२)। रथिरः (ऋ. ३.१.१७)॥

---

1. कच्छुरः ड. 2. विद्यते ह. 3. भवति नास्ति फ. 4. कूवरम् इत्यधिकम् क. 5. कुमारावः नास्ति फ. 6. कुञ्जारवः ह. 7. राजीवः ड. 8. सलोपश्च ह. 9. उदाहरणमिदं नास्ति फ.